# দক্ষিণা মূর্তি স্তোত্রং

শাংতিপাঠঃ
ওং যো ব্ৰহ্মাণং ৱিদধাতি পূৰ্ৱং
যো ৱৈ ৱেদাংশ্চ প্ৰহিণোতি তস্মৈ ।
তং হ দেৱমাত্মবুদ্ধিপ্ৰকাশং
মুমুক্ষুৰ্ৱৈ শৰণমহং প্ৰপদ্যে ॥

ধ্যানং
ওং মৌনৱ্যাখ্যা প্ৰকটিত পৰব্ৰহ্মতত্ত্বং যুৱানং
ৱৰ্ষিষ্ঠাংতে ৱসদৃষিগণৈৰাৱৃতং ব্ৰহ্মনিষ্ঠৈঃ ।
আচাৰ্যেংদ্ৰং কৰকলিত চিন্মুদ্ৰমানংদমূৰ্তিং
স্বাত্মাৰামং মুদিতৱদনং দক্ষিণামূৰ্তিমীডে ॥ 1 ॥

ৱটৱিটপিসমীপেভূমিভাগে নিষণ্ণং
সকলমুনিজনানাং জ্ঞানদাতাৰমাৰাত্ ।
ত্ৰিভুৱনগুৰুমীশং দক্ষিণামূৰ্তিদেৱং
জননমৰণদুঃখচ্ছেদদক্ষং নমামি ॥ 2 ॥

চিত্ৰং ৱটতৰোৰ্মূলে ৱৃদ্ধাঃ শিষ্যা গুৰুৰ্যুৱা ।
গুৰোস্তু মৌনং ৱ্যাখ্যানং শিষ্যাস্তুচ্ছিন্নসংশযাঃ ॥ 3 ॥

নিধযে সৰ্ৱৱিদ্যানাং ভিষজে ভৱৰোগিণাম্ ।
গুৰৱে সৰ্ৱলোকানাং দক্ষিণামূৰ্তযে নমঃ ॥ 4 ॥

ওং নমঃ প্ৰণৱাৰ্থায শুদ্ধজ্ঞানৈকমূৰ্তযে ।
নিৰ্মলায প্ৰশাংতায দক্ষিণামূৰ্তযে নমঃ ॥ 5 ॥

চিদ্ঘনায মহেশায ৱটমূলনিৱাসিনে ।
সচ্চিদানংদৰূপায দক্ষিণামূৰ্তযে নমঃ ॥ 6 ॥

ঈশ্ৱৰো গুৰুৰাত্মেতি মূৰ্তিভেদৱিভাগিনে ।
ৱ্যোমৱদ্ব্যাপ্তদেহায দক্ষিণামূৰ্তযে নমঃ ॥ 7 ॥

অংগুষ্ঠতৰ্জনী যোগমুদ্ৰা ৱ্যাজেনযোগিনাম্ ।
শৃত্যৰ্থং ব্ৰহ্মজীৱৈক্যং দৰ্শযন্যোগতা শিৱঃ ॥ 8 ॥

ওং শাংতিঃ শাংতিঃ শাংতিঃ ॥

স্তোত্ৰং
ৱিশ্ৱং দৰ্পণ-দৃশ্যমান-নগৰী তুল্যং নিজাংতৰ্গতং
পশ্যন্নাত্মনি মাযযা বহিৰিৱোদ্ভূতং যথা নিদ্ৰযা ।
যস্সাক্ষাত্কুৰুতে প্ৰভোধসমযে স্বাত্মানমে ৱাদ্ৱযং

দক্ষিণা মূর্তি স্তোত্রং

তস্মৈ শ্রীগুরুমূর্তযে নম ইদং শ্রী দক্ষিণামূর্তযে ‖1‖

বীজস্যাংতরি-ৱাংকুরো জগদিতং প্রাঙ্ৱিনির্ৱিকল্পং পুনঃ
মাযাকল্পিত দেশকালকলনা ৱৈচিত্র্যচিত্রীকৃতম্ |
মাযাৱীৱ ৱিজৃংভযত্যপি মহাযোগীৱ যঃ স্ৱেচ্ছযা
তস্মৈ শ্রীগুরুমূর্তযে নম ইদং শ্রী দক্ষিণামূর্তযে ‖2‖

যস্যৈৱ স্ফুরণং সদাত্মকমসত্কল্পার্থকং ভাসতে
সাক্ষাত্তত্ৱমসীতি ৱেদৱচসা যো বোধযত্যাশ্রিতান্ |
যস্সাক্ষাত্করণাদ্ভৱেন্ন পুরনাৱৃত্তির্ভৱাংভোনিধৌ
তস্মৈ শ্রীগুরুমূর্তযে নম ইদং শ্রী দক্ষিণামূর্তযে ‖3‖

নানাচ্ছিদ্র ঘটোদর স্থিত মহাদীপ প্রভাভাস্ৱরং
জ্ঞানং যস্য তু চক্ষুরাদিকরণ দ্ৱারা বহিঃ স্পংদতে |
জানামীতি তমেৱ ভাংতমনুভাত্যেতত্সমস্তং জগত্
তস্মৈ শ্রী গুরুমূর্তযে নম ইদং শ্রী দক্ষিণামূর্তযে ‖4‖

দেহং প্রাণমপীংদ্রিযাণ্যপি চলাং বুদ্ধিং চ শূন্যং ৱিদুঃ
স্ত্রী বালাংধ জডোপমাস্ত্ৱহমিতি ভ্রাংতাভৃশং ৱাদিনঃ |
মাযাশক্তি ৱিলাসকল্পিত মহাৱ্যামোহ সংহারিণে
তস্মৈ শ্রী গুরুমূর্তযে নম ইদং শ্রী দক্ষিণামূর্তযে ‖5‖

রাহুগ্রস্ত দিৱাকরেংদু সদৃশো মাযা সমাচ্ছাদনাত্
সন্মাত্রঃ করণোপ সংহরণতো যোঽভূত্সুষুপ্তঃ পুমান্ |
প্রাগস্ৱাপ্সমিতি প্রভোদসমযে যঃ প্রত্যভিজ্ঞাযতে
তস্মৈ শ্রী গুরুমূর্তযে নম ইদং শ্রী দক্ষিণামূর্তযে ‖6‖

বাল্যাদিষ্ৱপি জাগ্রদাদিষু তথা সর্ৱাস্ৱৱস্থাস্ৱপি
ৱ্যাৱৃত্তা স্ৱনু ৱর্তমান মহমিত্যংতঃ স্ফুরংতং সদা |
স্ৱাত্মানং প্রকটীকরোতি ভজতাং যো মুদ্রযা ভদ্রযা
তস্মৈ শ্রী গুরুমূর্তযে নম ইদং শ্রী দক্ষিণামূর্তযে ‖7‖

ৱিশ্ৱং পশ্যতি কার্যকারণতযা স্ৱস্ৱামিসংবংধতঃ
শিষ্যচার্যতযা তথৈৱ পিতৃ পুত্রাদ্যাত্মনা ভেদতঃ |
স্ৱপ্নে জাগ্রতি ৱা য এষ পুরুষো মাযা পরিভ্রামিতঃ
তস্মৈ শ্রী গুরুমূর্তযে নম ইদং শ্রী দক্ষিণামূর্তযে ‖8‖

ভূরংভাংস্যনলোঽনিলোংবর মহর্নাথো হিমাংশুঃ পুমান্
ইত্যাভাতি চরাচরাত্মকমিদং যস্যৈৱ মূর্ত্যষ্টকম্ |
নান্যত্কিংচন ৱিদ্যতে ৱিমৃশতাং যস্মাত্পরস্মাদ্বিভো

তস্মৈ শ্রী গুরুমূর্তযে নম ইদং শ্রী দক্ষিণামূর্তযে ॥9॥

সর্ৱাত্মত্বমিতি স্ফুটীকৃতমিদং যস্মাদমুষ্মিন্ স্তৱে
তেনাস্ব শ্রৱণাত্তদর্থ মননাদ্ধ্যানাচ্চ সংকীর্তনাত্ |
সর্ৱাত্মত্ব মহাৱিভূতিসহিতং স্যাদীশ্বরত্বং স্বতঃ
সিদ্ধ্যেত্তত্পুনরষ্টধা পরিণতং চৈশ্বর্য-মৱ্যাহতম্ ॥10॥

॥ইতি শ্রীমচ্ছংকরাচার্যৱিরচিতং দক্ষিণামূর্তিস্তোত্রং সংপূর্ণম্ ॥